# माध्यमिक शिक्षा मंडल, मध्य प्रदेश



## sample Paper
## 2024

aglasem.com

केवल अभ्यास हेतु नमूना प्रश्न पत्र

**Sample Question Paper for Practice only**

हायर सेकेण्ड्री स्कूल परीक्षा – 2024

**Higher Secondary Examination – 2024**

विषय – संस्कृत

**Subject - Sanskrit**

| Total Question | Total Printed Pages | Time | Maximum Marks |
|---|---|---|---|
| 23 | 06 | 3:00 Hours | 80 |

निर्देशा :– (i) सर्वे प्रश्नाः निर्देशानुसारेण अनिवार्याः सन्ति।
(ii) प्रश्नानां सम्मुखे अङ्•काः प्रदत्ताः।

प्रश्न 01. उचितं विकल्पं चित्वा लिखत। 1 X 6 = 6

(क) 'वक्तव्यम्' इत्यस्मिन् पदे प्रत्ययः अस्ति –
(i) तव्यत् (ii) क्त
(iii) क्त्वा (iv) तुमुन्

(ख) 'श्रुत्वा' इत्यस्मिन् पदे प्रत्ययः अस्ति –
(i) त्वा (ii) श्रु
(iii) श्रुति (iv) क्त्वा

(ग) 'ल्यप्' प्रत्ययान्तपदम् अस्ति –
(i) सनयः (ii) तनयः
(iii) अनूच्य (iv) कर्त्तव्यः

(घ) 'देवपितृकार्याभ्यां न प्रमदितव्यम्' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –
(i) देवपितृ (ii) कार्याभ्याम्
(iii) न (iv) प्रमदितव्यम्

(ङ) अधोलिखितेषु अव्ययम् अस्ति –
(i) सीता (ii) लता
(iii) रामः (iv) अत्र

(च) अधोलिखितेषु अव्ययं नास्ति –
(i) यत्र (ii) अति
(iii) अपि (iv) लक्ष्मणः



schools.aglasem.com
aglasem.com

प्रश्न 02. रिक्तस्थानपूर्तिं कुरूत। 1 X 7 = 7

(क) आचार्यः ............................... अनुशास्ति। (अन्तेवासिनं / ग्रामवासिनं)
(ख) ............................ गुणं वेत्ति। (गुणी / अवगणी)
(ग) ........................... विनयं ददाति। (धनं / विद्या)
(घ) 'जलम्' इत्यस्य पदस्य पर्यायपदं ........................... भवति। (धरि / वारि)
(ङ) 'आशायाः' इत्यस्य पदस्य विलोमपदं ....................... भवति। (विराशा / निराशायाः)
(च) 'क्षता' इत्यस्य पदस्य विलोमपदं ............................ भवति। (अक्षता / पिक्षता)
(छ) 'रात्रिः' इत्यस्य पदस्य पर्यायपदं ............................ भवति। (त्रिशा / निशा)

प्रश्न 03. एकवाक्येन उत्तरं लिखत। 1 X 6 = 6

(क) 'शिवं नमः' इत्यस्य वाक्यस्य शुद्धं रूपं किं भवति ?
(ख) 'अभितः परितः उभयतः' योगे का विभक्तिः भवति ?
(ग) 'भवति' इत्यस्मिन् पदे कः लकारः अस्ति ?
(घ) 'पठिष्यति' इत्यस्मिन् पदे का धातुः अस्ति ?
(ङ) 'अपश्यत्' इत्यस्मिन् पदे किम् वचनम् अस्ति ?
(च) 'भू' धातोः लृट्लकारे प्रथमपुरूषस्य एकवचनं रूपं किं भवति ?

प्रश्न 04. शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत। 1 X 6 = 6

(क) 'ततिः + तरूणाम्' = ततिस्तरूणाम् भवति।
(ख) 'शरीरेऽरिः' इत्यस्मिन् पदे पूर्वरूपसन्धिः अस्ति।
(ग) 'गणेशः' इत्यस्मिन् पदे व्यञ्जन सन्धिः अस्ति।
(घ) 'निधाय' इत्यस्मिन् पदे 'नि' उपसर्गः अस्ति।
(ङ) 'अधिकारः' इत्यस्मिन् पदे 'अधि' उपसर्गः न अस्ति।
(च) 'प्रविश्य' इत्यस्मिन् पदे 'प्र' उपसर्गः अस्ति।

प्रश्न 05. उचितं मेलनं कुरूत। 1 X 7 = 7

| | (अ) | | (ब) |
|---|---|---|---|
| (क) | एकेन | (i) | ब्राह्मणः |
| (ख) | ज्योतिः शास्त्रपारंगतः | (ii) | मदालसा |
| (ग) | सर्वविद्यानिष्णाता | (iii) | सुपुत्रेण |
| (घ) | प्रभूतम् | (iv) | द्वन्द्वः समासः |
| (ङ) | मातापितरौ | (v) | धनम् |
| (च) | पादध्वनिः | (vi) | क्षणस्य अनन्तरम् |
| (छ) | क्षणानन्तरम् | (vii) | कुण्डला |
| | | (viii) | पादयोः ध्वनिः |



schools.aglasem.com
aglasem.com

प्रश्न 06. काभ्यां न प्रमदितव्यम् ? (2)

अथवा

मूर्तिमती हल्दीघाटी कथम् आटीकते ?

प्रश्न 07. रविः रसं किमर्थम् आदत्ते ? (2)

अथवा

लक्ष्मणेन किं कर्तुं निश्चयः कृतः ?

प्रश्न 08. रात्रौ के के प्रविशन्ति ? (2)

अथवा

सभायां कीदृशः ब्राह्मणः आगतवान् ?

प्रश्न 09. केषां समाजे अपण्डितानां मौनं विभूषणम् ? (2)

अथवा

मनुष्यः किं त्यजेत् ?

प्रश्न 10. अपौरूषेयं किम् अस्ति ? (2)

अथवा

भोज : कस्य पुत्रः आसीत् ?

प्रश्न 11. युग्ममेलनं कुरूत। ½ X 4 = 2

| | (अ) | | (ब) |
|---|---|---|---|
| (क) | भासः | (i) | नैषधीयचरितम् |
| (ख) | सौन्दरनन्दः | (ii) | कर्णभारम् |
| (ग) | श्री हर्ष | (iii) | अश्वघोषः |
| (घ) | शिशुपालवधम् | (iv) | कालिदासः |
| | | (v) | माघः |
| | | (vi) | भारवि |

प्रश्न 12. पञ्चतन्त्रस्य लेखकः कः ? पञ्चतन्त्रे कति तंत्राः सन्ति ? नामानि लिखत । (2)

अथवा

कालिदासस्य कृतीनां नामानि लिखत ?

प्रश्न 13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकं सुभाषितं लिखत । (2)

प्रश्न 14. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरूत। (कोऽपि द्वय) (2)

(i) भूतेषु दया एव दैवी सम्पद्।

(ii) मदालसा ज्ञानस्य कतिपयबिन्दून् एव प्राप्तवती।

(iii) सः प्रजानामेव भूत्यर्थं बलिम् अग्रहीत्।



schools.aglasem.com
aglasem.com

प्रश्न 15. अधोलिखितेषु वाक्येषु द्वयोः वाक्ययोः कः कं प्रति कथयति इति लिखत। (2)

(i) नारी जीवनयात्रायां कमपि सहचरमपेक्षते।
(ii) अहम् न कस्यापि संकेतैः नर्तितुं पारयामि।
(iii) रोहितव्ये काले सौमित्रिणा धनुर्गृहीतम्।

प्रश्न 16. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। (3)

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न् प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्।

प्रश्नाः (i) कम् अनुच्य आचार्यः अन्तेवासिनम् अनुशास्ति ?
(ii) कस्मै प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ?
(iii) कस्मात् मा प्रमदः ?

अथवा

पुरा धाराराज्ये सिन्धुल–संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्च–वार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य राज्यं पुत्राय प्रयच्छामि। तदा लोकापवादः।

प्रश्नाः (i) पुरा कः राजा चिरं प्रजाः पर्यपालयत् ?
(ii) तस्य कः पुत्रः समजनि ?
(iii) राज्ञः अनुजः कः आसीत् ?

प्रश्न 17. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। (3)

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भ सदृशोदय : ।।

प्रश्नाः (i) दिलीपस्य प्रज्ञा कीदृशी आसीत् ?
(ii) दिलीपस्य आगमः कथम् आसीत् ?
(iii) आगमैः सदृशः कः आसीत् ?

अथवा

न दुर्जनः सज्जनतामुपैति शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधान्समुद्रे न मन्दरो मार्दवमभ्युपैति।।

प्रश्नाः (i) कः सज्जनतां न उपैति ?
(ii) कः मार्दवम् न अभ्युपैति ?
(iii) 'सज्जनः' इत्यस्य विलोमपदं पदयांशात् चित्वा लिखत।



schools.aglasem.com
aglasem.com

प्रश्न 18. अधोलिखितं नाट्यांशं पठित्वा प्रश्ननाम् उत्तराणि संस्कृतभाषायां लिखत। (3)

काञ्चुकीयः – परित्रायतां परित्रायतां कुमार : ।
राम : – आर्यः ! कः परित्रातत्यः ।
काञ्चुकीयः – महाराज !
राम : – महाराजः इति । आर्य ! ननु वक्तव्यम्।
एक शरीर संक्षिप्ता पृथिवी रक्षितव्येति।
अथ कुत उत्पन्नोऽयं दोषः ?

प्रश्नाः (i) कः परित्रातव्यः ?
(ii) 'परित्रायतां कुमारः' इति कः अवदत् ?
(iii) 'उत्पन्नोऽयं' इत्यस्य पदस्य सन्धिविच्छेदं कुरूत।

अथवा

मदालसा – हरिश्चन्द्रः स्वपत्नीं शैटयां पुत्रं रोहितं चं जनसंकुले आपणे विक्रीतवान्। नास्ति मे मनोरथः ईदृशं पत्नीपदमङ्गीकर्तुम्।
कुण्डला – कटुसत्यं खल्वेतत्। परं सखि ! अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरूषाः वसंन्ति। स्वप्रकृत्यनुकूलः वरः अपि प्राप्यते। त्वं तु नवनवोन्मेषशालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयसि।

प्रश्नाः (i) हरिश्चन्द्रस्य पत्नी का आसीत् ?
(ii) हरिश्चन्द्रः स्वपत्नीं पुत्रं च किं कृतवान् ?
(iii) अस्मिन् संसारे कीदृशाः पुरूषाः वसन्ति ?

प्रश्न 19. रिक्तस्थानपूर्तिं कुरूत (कोऽपि त्रयः) (3)
(i) नैकेनापि समं गता ....................................... ।
(ii) .................................. वद ।
(iii) एषा ..................................... ।
(iv) अजीर्णे भेषजं ........................ ।
(v) सर्वस्य लोचनं ............................... अस्ति।

प्रश्न 20. अधोलिखितं अपठितगद्यांशं सम्यक् पठित्वा प्रश्ननाम् उत्तराणि संस्कृते लिखत। (4)
(कोऽपि चत्वारः)

गंगातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म। तस्य गुरूकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रियशिष्यः। तस्य द्वांदशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरूः तम् आहूय अवदत्" शिष्य! अधुना भवान् सर्वविद्यापारंगतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम्। किन्तु गृहस्यान्तः न गन्तव्यम्।"

प्रश्नाः (i) मार्कण्डेयः नाम मुनिः कुत्र वसति स्म ?
(ii) गुरूकुले बहवः के आसन् ?
(iii) गमनात् पूर्वं भवता कस्य गृहं दृष्ट्वा आगन्तव्यम् ?
(iv) मार्कण्डेस्य प्रियशिष्यः कः ?
(v) सर्वविद्यापारंगतः कः अस्ति ?



schools.aglasem.com
aglasem.com

प्रश्न 21. प्रदत्तैः शब्दैः अनुच्छेदं लेखनं कुरूत। (4)

(भव, अतिथिदेवो, प्रमदितव्यम्, देवपितृकार्याभ्यां)

स्वाध्याय – प्रवचनाभ्यां न ................................ । .......................... न प्रमदितव्यम्।

मातृदेवो भव। पितृदेवो ........................ । आचार्यदेवो भव। .......................... भव ।

'अथवा'

(प्रत्यागतं, कस्यापि, निपुणं, भुशुण्डीं)

संवृत्ते किञ्चिदन्धकारे .......................... स्कन्धं निधाय .......................... निरीक्षमाणः, आगत ................................च विदधानः, प्रतापदुर्गदौवारिकः .......................... पादक्षेप ध्वनिमिवाश्रौषीत्।

प्रश्न 22. स्वप्राचार्याय शुल्कमुक्त्यर्थं आवेदनं लिखत। (4)

'अथवा'

स्वमित्रं प्रति एकं निमन्त्रण पत्रं संस्कृतभाषायां लिखत।

प्रश्न 23. अधोलिखितेषु एकस्य कवेः संक्षिप्तपरिचयं लिखत। (4)

(i) महाकवि : कालिदास :
(ii) भवभूतिः
(iii) भासः
(iv) बाणभट्टः

————————————XXX————————————

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com



aglasem.com
schools.aglasem.com